दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-183 | 1 | अप्रैल 25, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् वैशाखशुक्लनवमी
बैशाख 12 प्रविष्ठांशः मङ्गलमयः भवेत्

2 राष्ट्रपतेः मुर्मू-वर्यायाः हिमाचल-प्रवासं लक्षीकृत्य सज्जताः तीव्रताः, मुख्यसचिवेन व्यवस्थानां समीक्षा कृता

3 सरदार-पटेल-विश्वविद्यालय-मण्डी-नगरस्य यूट्यूब-वाहिन्याः विधिवत् शुभारम्भः

4 सीतामढ्याम् भव्यं शिलापूजनम्, मुख्यमन्त्री सम्राटचौधरी उद्घाटनं करिष्यति

## महिलायाः प्रजनन-सम्बद्ध-स्वायत्तता सर्वोपरि वर्तते - सर्वोच्चन्यायालयः



सर्वोच्चन्यायालयः एकस्मिन् महत्त्वपूर्णे निर्णये प्रतिपादितवान् यत् कोऽपि न्यायालयः कामपि महिलां, विशेषतः अल्पवयस्कां, तस्याः इच्छायाः विरुद्धं गर्भ धारणार्थं बाधयितुं न शक्नोति। न्यायमूर्ति-बी.वी. नागरत्ना तथा च न्यायमूर्ति-उज्ज्वल-भुईया इत्यनयोः न्यायपीठेन एकस्याः पञ्चदशवर्षीयायाः बालिकायाः सप्तमासाधिकं गर्भ चिकित्सकीय-रीत्या निष्कासयितुं अनुमतिः प्रदत्ता। पीठेन स्पष्टीकृतं यत् महिलायाः प्रजनन-सम्बद्ध-स्वायत्तता सर्वोपरि वर्तते। न्यायालयस्य मते महिलायाः शारीरिकी मानसिकी च अखण्डता लोकतन्त्रस्य आधारभूता अस्ति। न्यायालयेन एतदपि प्रोक्तं यत् स्वस्य शरीरस्य विषये निर्णयाधिकारः विशेषतः प्रजननसम्बद्धेषु विषयेषु संविधानस्य एकविंशतितमस्य अनुच्छेदस्यान्तर्गतं व्यक्तिगत-स्वातन्त्र्यं गोपनीयता च अनिवार्यः अंशः अस्ति।

## सर्वोच्चन्यायालयेन विशेष गहन पुनरीक्षणे पश्चिमबङ्गाल मतदातृ-सूचीतः नाम-निष्कासन-विरुद्धं याचिका-श्रवणं निराकृतम्



सर्वोच्चन्यायालयेन पश्चिमबंगाले विशेष गहन संशोधनस्य अनन्तरं मतदातृसूचीतः तेषां नाम्नां निष्कासनेन व्यथितानां जनानां रिट्-याचिकायाः श्रवणं निराकृतम्। परन्तु वर्तमान-विधानसभा निर्वाचने ते निर्वाचन अधिकारिणः सन्ति इति सूचितम्। भारतस्य मुख्यन्यायाधीशस्य सूर्यकान्तस्य नेतृत्वे पीठेन याचकेभ्यः याचिका न्यायाधिकरणं प्रति गन्तु निर्देशः कृतः। एतानि न्यायाधिकरणानि विशेष-गहन संशोधनस्य परीक्षणप्रक्रियावधौ निर्वाचकसूच्यां नाम्नां विलोपनस्य विरुद्धं विहित याचिकानां विचारार्थं निर्मितानि सन्ति।

## पश्चिमबङ्गाले द्वितीयचरणस्य मतदानाय निर्वाचन प्रचारः चरमोत्कर्षे वर्तते



पश्चिमबङ्गालराज्ये द्विचत्वारिंशदधिक-शतासनेभ्यः आगामि-एकोनत्रिंशत् दिनाङ्के आयोज्यमानस्य द्वितीय-अन्तिम चरणस्य मतदानाय सम्प्रति प्रचार-कार्य चरमोत्कर्षे वर्तते। भारतीय जनता पार्टीतिदलस्य वरिष्ठ नेता प्रधानमन्त्री नरेन्द्रमोदी गतदिवसे पानीहाटी इत्यत्र दलीय प्रत्याशिनां समर्थने एकां जनसभां सम्बोधितवान्। प्रधानमन्त्रिणा प्रतिपादितं यत् प्रथम चरणस्य प्रचण्ड-मतदानेन राज्ये परिवर्तनस्य स्पष्टः संकेतः प्राप्यते। सः अवदत् यत् आगामि-मासस्य चतुर्थ दिनाङ्के परिणामानन्तरं राज्यं भ्रष्टाचार-सिण्डिकेट्-राज-महिलापमान अवैधप्रवेश-वृत्तिहीनताभ्यः मुक्तो भविष्यति। अपरतः केन्द्रीयमन्त्री अमितशाहः कोलकाता नगरस्य न्यू टाउन् इत्यत्र वार्ताहर-सम्मेलने प्रमाणितवान् यत् भाजपा-दलं प्रथम-चरणस्य द्विपञ्चाशदधिकैकशत-आसनेषु दशाधिकशतात् अधिकानि आसनानि जेष्यति। तृणमूल-कॉङ्ग्रेस नेतृ ममता बनर्जी भवानीपुर क्षेत्रे प्रचारं कृतवती, अपरत्र तृणमूल-कॉङ्ग्रेसदलस्य महासचिवः अभिषेक बनर्जी च हावड़ा-दक्षिण २४-परगना मण्डलेषु पथप्रदर्शनं कृतवान् । कॉग्रेसांसदः राजीव शुक्लः उच्च-मतदान प्रतिशतस्य प्रशंसां कुर्वन् उक्तवान् यत् एषा सुखद घटना अस्ति, परन्तु अस्य वास्तविकः प्रभावः परिणामानन्तरमेव स्पष्टः भविष्यति।

## आम-आदमी-पार्टीति दलस्य त्रयः राज्यसभा सांसदाः राघव चड्ढा, सन्दीप-पाठकः, अशोक-मित्तलः चेत्येते दल-परित्यागस्य घोषणां अकुर्वन्



आम आदमी पार्टीति दलाय महत्तरं आघातं प्रयच्छन् तस्य त्रयः राज्यसभा सांसदाः राघव चड्ढा, सन्दीप-पाठकः, अशोक-मित्तलः चेत्येते दल-परित्यागस्य घोषणां अकुर्वन्। नवदेहल्यां वार्ताहर-सम्मेलने राघव चड्ढा इत्यसौ उद्घोषितवान् यत् सः अन्यैः कतिपयैः राज्यसभा सांसदैः सह भारतीय जनता पार्टीति दले सम्मिलितो भविष्यति। अनेन राजनैतिक परिवर्तनेन संसदः उच्च सदने समीकरणानि परिवर्तयितुं शक्नुवन्ति।

## देशे एलपीजी इत्यस्य आपूर्तिः सुचारु-रूपेण प्रचलति कुत्रापि वातेन्धनस्य न्यूनता नास्ति-केन्द्रसर्वकारः

केन्द्रसर्वकारेण स्पष्टीकृतं यत् पश्चिम एशिया-क्षेत्रे उत्पन्नायाः स्थितेः सत्त्वादपि देशे एलपीजी इत्यस्य आपूर्तिः सुचारु-रूपेण प्रचलति । कुत्रापि वातेन्धनस्य न्यूनता नास्ति। नवदेहल्यां मन्त्रालय-स्तरीये उपवेशने पेट्रोलियम प्राकृतिक गैस-मन्त्रालयस्य सचिवः सुजाता शर्मा अवदत् यत् सर्वकारः देशे गार्हस्थिक-इन्धनस्य अबाध-प्रवाहं सुनिश्चिनोति । तया ग्राहकाः परामृष्टाः यत् ते ऑनलाइन-माध्यमेन सिलेण्डर-पञ्जीकरणं कुर्वन्तु तथा च विक्रेतु-केन्द्रेषु अवरोधं मा कुर्वन्तु। सा अग्रे सूचितवती यत् वाणिज्यिक एलपीजी-आपूर्तिः अपि सप्तति-प्रतिशतं यावत् पुनः स्थापिता अस्ति। देशे पेट्रोल-डीजल-इन्धनयोः अपि पर्याप्तः सङ्ग्रहः विद्यते ।

## सुभाषितम्

**यादृशैः सन्निविशते,**
**यादृशांश्चोपसेवते।**
**यादृगिच्छेच्च भवितुं,**
**तादृग्भवति पूरूषः॥**

भावार्थः- मनुष्य, जिस प्रकार के लोगों के साथ रहता है, जिस प्रकार के लोगों की सेवा करता है, जिनके जैसा बनने की इच्छा करता है, निश्चित रूप से वह वैसा ही बन जाता है।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्



## भारतीय-ऋतु-विभागः

भारतीय-ऋतुविज्ञान-विभागेन सोमवासरपर्यन्तं राजस्थाने, उत्तरप्रदेशे, छत्तीसगढ़ मध्यप्रदेशे, विदर्भ च उष्णतरङ्गस्य सम्भावना व्यक्तीकृता। दिल्ली-चण्डीगढ़ हरियाणा पञ्जाब-बिहारेषु अपि एतादृशी स्थितिः एव स्थास्यति। विभागेन प्रोक्तं यत् अस्मिन् समये एव कोङ्कणप्रदेशे, पश्चिमबङ्गाले, ओडिशायां, तमिलनाडौ, तटीय आन्ध्रप्रदेशे, तटीय-कर्नाटके तथा गुजरातस्य तटीयप्रदेशेषु उष्णार्द्रा च स्थितिः प्रवर्तिष्यते।

# ऊना-मण्डले भीषणः अग्निप्रलयः, ३० कुटीराः भस्मीभूताः; न आहारः अवशिष्टः न च पात्राणि; अग्निशमन-दलेन महता परिश्रमेण अग्निः नियन्त्रितः



**हिमसंस्कृतवार्ताः- ऊना।** नगरस्य पुरातन-होशियारपुर- मार्गस्थितस्य 'लालसिंगी' क्षेत्रे शुक्रवासरे पूर्वाह्णे प्रायः ११:५० वादने अग्निप्रज्वालनेन ३० कुटीराः दग्धाः अभवन्। अस्मिन् उत्तरप्रदेश- बिहारराज्ययोः श्रमिकाणां धनं, वस्त्राणि, आहारः (खाद्यान्नम्), पात्राणि चापि सर्वाणि गृहवस्तूनि भस्मीभूतानि।

**अग्निप्रज्वालनस्य कारणं न स्पष्टम्**

अग्निशमनविभागानुसारं अस्यां घटनायां प्रायः २.९० लक्षरूप्यकाणां हानिः अनुमानिता अस्ति, यदा तु प्रायः १५ लक्षरूप्यकाणां सम्पत्तिः रक्षिता। सौभाग्यवशात् अस्यां घटनायां कोऽपि जनः हताहतः न जातः। अग्निप्रज्वालनस्य कारणानि अद्यापि स्पष्टानि न सन्ति। कथ्यते यत् एकस्मिन् कुटीरे प्रज्वलितः अग्निः सर्वान् कुटीरान् स्वकवलने अकरोत्। सूचनानुसारं मार्गपार्श्वे स्थिते एकस्मिन् कुटीरे अकस्मात् अग्निः प्रादुर्भूतः। तीव्रवातायनेन पश्यतामेव अग्निः समीपस्थान् कुटीरान् अपि व्याप्नोत्। कतिपयनिमेषेषु एव सम्पूर्णं क्षेत्रं ज्वालाभिः आवृतम् अभवत्, येन स्थाने धावमानता (व्याकुलता) व्याप्ता।

**दुर्घटनायां कापि जनहानिः न जाता**

सूचनां प्राप्य अग्निशमनविभागस्य दलानि घटनास्थलं प्राप्तवन्तः अग्निशमनकार्यं च प्रारब्धवन्तः। प्रायः सार्धैकहोरायाः (१.५ घण्टा) कठिनपरिश्रमेण अग्निः नियन्त्रितः। अग्निशमनार्थं विभागस्य त्रीणि वाहनानि घटनास्थले नियुक्तानि आसन्, यदा तु नव (९) दमकलवाहनानां प्रयोगः कृतः। अस्यां दुर्घटनायां कापि जनहानिः न अभवत्, किन्तु प्रभाविताः परिवाराः महतीं आर्थिकहानिं सोढवन्तः। घटनायाः पश्चात् बहवः जनाः तत्र एकत्रिताः अभवन् तथा च क्षेत्रे सुदीर्घकालं यावत् कोलाहलपूर्णं वातावरणं निर्मितम् आसीत्।"लालसिंगी-क्षेत्रे प्रज्वलिते अग्नौ ३० कुटीराः दग्धाः। हानेः मूल्याङ्कनं प्रायः २.९० लक्षरूप्यकाणि कृतम्, यदा तु १५ लक्षरूप्यकाणां सम्पत्तिः सुरक्षिता। अग्निप्रज्वालनस्य कारणानि अद्यापि न ज्ञातानि, अन्वेषणं च प्रचलति।"

**-सुरेश कुमारः,अग्निशामक-अधिकारी**

# राष्ट्रपतेः मुर्मू-वर्यायाः हिमाचल-प्रवासं लक्षीकृत्य सज्जताः तीव्रतराः, मुख्यसचिवेन व्यवस्थानां समीक्षा कृता



**हिमसंस्कृतवार्ताः - शिमला।** भारतस्य राष्ट्रपतेः द्रौपदी-मुर्मू-वर्यायाः हिमाचल-प्रवासं अधिकृत्य सिद्धताः तीव्रतराः जाताः सन्ति। अस्मिन् क्रमे शुक्रवासरे मुख्यसचिवस्य सञ्जयगुप्तस्य अध्यक्षतायां शिमला-स्थित-राज्यसचिवालये आयोजितायाम् उच्चस्तरीयायां गोष्ठ्यां राष्ट्रपतेः २७ अप्रैलतः २ मई २०२६ दिनाङ्कपर्यन्तं प्रस्तावितस्य प्रवासस्य व्यवस्थानां विस्तृता समीक्षा कृता। राष्ट्रपतिः २७ अप्रैल दिनाङ्के स्वकीये एकसप्ताहस्य हिमाचल-प्रवासाय शिमलां प्राप्स्यति। गोष्ठ्यां गते सप्ताहे आयोजितायां समीक्षागोष्ठ्यां स्वीकृतानां निर्णयानां स्थितेः तथा तेषु कृतकार्यविधीनां विस्तृतं विवेचनं कृतम्। प्रवासस्य सुचारु-सुरक्षित-सञ्चालनं सुनिश्चितं कर्तुं विविधपक्षेषु विस्तरेण चर्चा अभवत्।अस्याः गोष्ठ्याः मुख्य-विषयेषु व्यापकाः सुरक्षा-प्रबन्धाः, सुरक्षा-पारपत्राणां (Security Passes) सम्बद्धाः विषयाः, यातायात-प्रबन्धनं, प्रेस-कवरेज-समन्वयः तथा प्रवासेन सह सम्बद्धाः अन्ये विषयाः सम्मिलिताः आसन्। राष्ट्रपतेः प्रस्तावित-काङ्गड़ा-शिमला-लाहौल-स्पीति-जनपदानां प्रवासानां सज्जीकरणानाम् अपि विस्तरेण समीक्षा कृता। मुख्यसचिवेन सर्वेषां विभागानां संस्थानां च मध्ये श्रेष्ठ-समन्वये, सुरक्षा-नियम-पालने (Security Protocol) तथा सर्वासाम् व्यवस्थानां समयबद्ध-क्रियान्वयने बलं दत्तम्। तेन सम्बद्धाधिकारिणः निर्दिष्टाः यत् सुचारु-सुरक्षित-सुव्यवस्थित-प्रवासाय सर्वाः आवश्यकीः व्यवस्थाः सुनिश्चिताः क्रियेरन्।

# मुख्यमन्त्रि- कांग्रेसाध्यक्ष- उपमुख्यमन्त्रिणां नेतृत्वे नगरनिगम-निर्वाचनं योत्स्यते काङ्ग्रेसदलम्, निर्वाचनसमितीनां गठनम्



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेश-काङ्ग्रेससमित्या सोलन- मण्डी- धर्मशाला- पालमपुर- नगरनिगमनिर्वाचनानां कृते निर्वाचनसमितीनां सङ्घटनं कृतम् अस्ति। चतुर्णां नगरनिगमानां कृते पृथक्-पृथक् निर्वाचनसमितयः निर्मिताः सन्ति, किन्तु मुख्यः विषयः अयं यत् सर्वासु समितिषु मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः, प्रदेशाध्यक्षः विनयकुमारः, उपमुख्यमन्त्री मुकेश अग्निहोत्री च शीर्षस्तरे सम्मिलिताः सन्ति। अनेन स्पष्टं भवति यत् पक्षः एतानि निर्वाचनानि अतीव गम्भीरतया स्वीकृत्य शीर्षनेतृत्वस्य साक्षात् निरीक्षणे योत्स्यते।सङ्घटन-सर्वकारयोः समन्वयम् उत्पाद्य निर्वाचनानां कृते सूक्ष्मप्रबन्धनम् ('माइक्रो-मैनेजमेण्ट') इत्यस्य उपरि बलं दातुं प्रयासः कृतः। समितिषु मन्त्रिभिः सह स्थानीयविधायकाः, जनपद-काङ्ग्रेस-अध्यक्षाः च सम्मिलिताः, येन सङ्घटन-सर्वकारयोः मध्ये श्रेष्ठः समन्वयः स्थापितः भवेत्। एषा रणनीतिः न केवलं धरातलस्तरे आधारं सुदृढं करिष्यति, अपितु निर्वाचनप्रबन्धने उत्तरदायित्वमपि निश्चितं करिष्यति। आगामी-विधानसभा-निर्वाचनात् पूर्वं पक्षचिह्नेन प्रचलमानानि एतानि नगरनिगम- निर्वाचनानि काङ्ग्रेसदलस्य कृते अतीव महत्त्वपूर्णाणि सन्ति।

काङ्ग्रेस-दलेन विविधनगरनिगमेषु मन्त्रिणां नियुक्तिः तेषां क्षेत्रीयप्रभावं दृष्ट्वा कृता। सोलननगरे पक्षेण चत्वारः मन्त्रिणः प्रेषिताः। सोलन-सम्बद्धः स्वास्थ्यमन्त्री धनीरामशाण्डिलः, उद्योगमन्त्री हर्षवर्धनचौहानः, शिक्षामन्त्री रोहितठाकुरः, पञ्चायतीराजमन्त्री अनिरुद्धसिंहश्च उत्तरदायित्वं प्राप्तवन्तः। मण्डीनगरे लोकनिर्माणमन्त्री विक्रमादित्यसिंहः, उद्यान-राजस्वमन्त्री जगतसिंहनेगी च प्रमुखां भूमिकां लब्धवन्तौ। तत्रैव काङ्गड़ा-मण्डले कृषिमन्त्री प्रो. चन्द्रकुमारः, पालमपुरे नगरनियोजनमन्त्री राजेशधर्माणी, आयुर्वेद- क्रीडामन्त्री यादवेन्द्रगोमा च नियुक्ताः। मन्त्रिणां व्यतिरिक्तं सोलन-नगरनिगमनिर्वाचने पक्षेण चत्वारः विधायकाः अपि नियुक्ताः। सञ्जय अवस्थी, विनोद सुल्तानपुरी, रामकुमार चौधरी, हरदीप सिंह बावा इत्येतोः सह जनपद-काङ्ग्रेस- समिति- सोलन इत्यस्य अध्यक्षः सुभाषवर्मा अपि समितौ सम्मिलितः। मण्डी-नगरनिगमनिर्वाचनाय पूर्वमन्त्री कौलसिंहठाकुरः, प्रकाशचौधरी, विधायकः चन्द्रशेखरः, सुन्दरठाकुरश्च जनपद- काङ्ग्रेस-समित्यध्यक्षायाः चम्पाठाकुर्याः सह उत्तरदायित्वं प्राप्तवन्तः। धर्मशाला- नगरनिगमनिर्वाचनाय पर्यटननिगमस्य अध्यक्षः रघुवीरसिंहबाली, सांसदः अनुरागशर्मा, विधायकः केवलसिंहपठानिया, मलैन्द्रराजनः, पूर्वमहापौरः देवेन्द्रजग्गी, अजयमहाजनश्च समितौ सम्मिलिताः। पालमपुर- नगरनिगमनिर्वाचने सांसदः जनपद- काङ्ग्रेस- काङ्गड़ा-अध्यक्षः च अनुरागशर्मा, विधायकः आशीषबुटैलः, किशोरीलालः, सञ्जय रत्नः, भवानीसिंहपठानिया, कमलेशठाकुरश्च उत्तरदायित्वं प्राप्तवन्तः।

२९ अप्रैल दिनाङ्कात् नगर-निकाय-निर्वाचनानां नामाङ्कनप्रक्रिया आरभ्यते, किन्तु काङ्ग्रेस-दलस्य जनपद-अध्यक्षाः ३० अप्रैल पर्यन्तं धर्मशालायां प्रचलिते प्रशिक्षणशिबिरे व्यग्राः भविष्यन्ति। एवं सति अध्यक्षाणां निर्वाचनभूमिका प्रभाविता भवितुं शक्नोति इति आशङ्का वर्तते। निर्वाचनसमितिषु सदस्यत्वे सत्यपि प्रशिक्षणशिबिरकारणात् जनपद-अध्यक्षाः ३० अप्रैल पर्यन्तं गोष्ठीषु भागं ग्रहीतुं न शक्ष्यन्ति।

# सरदार-पटेल-विश्वविद्यालय-मण्डी-नगरस्य यूट्यूब-वाहिन्याः विधिवत् शुभारम्भः



## डिजिटल-मञ्चेन पारदर्शिता संवादशीलता च प्रवर्धिष्यते:

### कुलपतयः आचार्यः ललितकुमार अवस्थी

**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा**

सरदारपटेल- विश्वविद्यालयः मण्डीनगरस्य कुलपतिः आचार्यः ललितकुमार अवस्थी कुलपति- सचिवालये विश्वविद्यालयस्य आधिकारिक- यूट्यूब- वाहिन्याः विधिवत् शुभारम्भं कृतवन्तः। अस्मिन् अवसरे ते उक्तवन्तः यत् अस्मिन् डिजिटलयुगे सूचनानां त्वरित-प्रसारणाय एतादृशाः मञ्चाः अतीव महत्त्वपूर्णाः सन्ति। विश्वविद्यालयस्य एषा यूट्यूब-वाहिनी छात्रेभ्यः, शोधार्थिभ्यः, सामान्य- जनमानसाय च विश्वविद्यालयस्य शैक्षणिक- सांस्कृतिक-प्रशासनिक-गतिविधीनां प्रत्यक्षसूचनाः प्रदातुं सहायिका भविष्यति। ते प्रतिपादितवन्तः यत् अस्य माध्यमेन विश्वविद्यालयस्य पारदर्शिता संवादशीलता च सुदृढा भविष्यति। ते सर्वान् विभागान्, प्रकोष्ठान्, छात्रान् च आहूतवन्तः यत् अस्य मञ्चस्य सकारात्मकं प्रयोगं कृत्वा विश्वविद्यालयस्य सिद्धीः कार्यक्रमांश्च व्यापकस्तरे प्रसारयन्तु। ते विश्वासं प्रकटितवन्तः यत् एषा यूट्यूबवाहिनी विश्वविद्यालयस्य समाजस्य च मध्ये एकस्य सशक्तसेतुरूपेण कार्यं करिष्यति, शैक्षणिक- गतिविधिभ्यः नूतनां दिशं प्रदास्यति। अस्मिन् अवसरे शैक्षणिक-विषयाणां सह-अधिष्ठाता इतिहास- विभागाध्यक्षश्च डॉ. राकेशकुमारशर्मा एतम् उपक्रमं समयानुकूलं प्रतिपादयन्तः अवदन् यत् माननीय-कुलपतीनां दूरदर्शि-मार्गदर्शने प्रेरणास्पद-नेतृत्वे च आरब्धा एषा यूट्यूब-वाहिनी न केवलं विश्वविद्यालयस्य गतिविधीनां प्रभावी-प्रसारस्य माध्यमं भविष्यति, अपि तु अनेन शैक्षणिक- सांस्कृतिक- प्रशासनिक- कार्याणां सुव्यवस्थितं प्रलेखनम् अपि सशक्तरूपेण सम्भविष्यति। अस्मिन् कार्यक्रमे इतिहास- सोसायटी- इतिहास-विभागस्य अध्यक्षः सानू कुमारः, उपाध्यक्षः मनीषकुमारः, मीडिया- क्लब- अध्यक्षः दीपक दीपांशुः, सुधीरकुमारश्च उपस्थिताः आसन्।




## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। मया अद्य एका चिन्ताजनिका वार्ता श्रुता। एकेन कर्मकरेण स्वकार्यालयस्य दुर्दशा निन्दिता। "तत्र वातानुकूलयन्त्रं नास्ति, वातायनानि अपि न सन्ति" इति तेन उक्तम्। अनेन जनेषु महान् कोपः जनितः।

**नन्दिनी-** आम्, सा दुर्दशा खलु खेदजनिका। कार्यालयेषु सौकर्याणि आवश्यकानि। अपरा वार्ता अपि उद्योग-सम्बद्धा एव। प्रतिष्ठित- तन्त्रज्ञान- संस्थायाः एकेन पदवीधरेण अष्टाविंशति- लक्ष- रूप्यकाणां बहुमूल्यं कार्यं त्यक्तम्। नूतन-उद्योगानां कठोरं सत्यं च तेन प्रकाशितम्। 'यत् दश्यते, तत् न भवति' इति तेन उक्तम्।

**काव्या-** तत् सत्यम्। नूतन-उद्योगानां बाह्यरूपम् एव सुन्दरं भवति। एकेन अभ्यर्थिना संस्थायाः न्यून-मूल्याङ्कन-विषये नियोजकः पृष्टः। परन्तु सः प्रत्याशी तत्क्षणात् एव नियोजकेन निराकृतः। अनन्तरं सः प्रत्याशी भयम् अनुभूतवान् अस्ति।

**नन्दिनी-** अहो, एषः नियोजकानाम् अहङ्कारः! एतादृशः एव अन्यः विषयः मया पठितः। "स्वामिनः अहङ्कारः, भृत्यस्य वेतनम्" इति विषये एकं चलच्चित्रं प्रसारितम्। तस्मिन् कयाचित् कर्मकर- नियोजिकया अनुचिता प्रार्थना कृता। अनया वार्तया जनाः कोपं प्रदर्शितवन्तः सन्ति।

**काव्या-** सत्यं वदसि। अद्यतनः कार्यक्रमः अत्रैव समाप्यते। धन्यवादः।

# नूरपुर- देहरा- सरकाघाट- धर्मशाला- विद्यालयानां विलयः निरस्तः,




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशसर्वकारेण विद्यालयीय- शिक्षाव्यवस्थायां परिवर्तनं कुर्वता पूर्वतन-विलयस्य निर्णये आंशिकं संशोधनं कृतम्। शिक्षाविभागेन प्रसारितायाः नूतन-अधिसूचनायाः अनुसारं प्रदेशस्य चतुर्षु प्रमुखनगरेषु नूरपुर- धर्मशाला-सरकाघाट- देहरा क्षेत्रेषु बालकानां बालिकानां च वरिष्ठ-माध्यमिक-विद्यालयानां विलयः निरस्तः कृतः। एषः निर्णयः १८ फरवरी २०२६ दिनाङ्कस्य अधिसूचनायाः प्रधानेषु परिवर्तनं कुर्वन् स्वीकृतः। अधुना एते सर्वे विद्यालयाः पूर्ववत् पृथक् पृथक् रूपेण सञ्चालिताः भविष्यन्ति।

नूरपुरे 'पीएमश्री बख्शी टेक चन्द' राजकीय- आदर्श-कन्या- वरिष्ठ- माध्यमिक- विद्यालयः, राजकीय- बाल- वरिष्ठ- माध्यमिक- विद्यालयः; धर्मशालायां 'पीएमश्री' कन्या- वरिष्ठ- माध्यमिक- विद्यालयः, राजकीय- बाल- वरिष्ठ- माध्यमिक- विद्यालयः; सरकाघाटे 'पीएमश्री' राजकीय- आदर्श- वरिष्ठ-माध्यमिक- विद्यालयः, कन्या- वरिष्ठ- माध्यमिक-विद्यालयः; देहरायां च 'पीएमश्री' राजकीय- आदर्श-वरिष्ठ- माध्यमिक- विद्यालयः, कन्या- वरिष्ठ-माध्यमिक- विद्यालयश्च एतान् सर्वान् सर्वकारेण पूर्वं विलीनीकरणं कृत्वा सह-शिक्षा-विद्यालयाः निर्मिताः आसन्, यत् अधुना निरस्तं जातम्।

## का भविष्यति नूतना व्यवस्था?

सर्वकारेण स्पष्टीकृतं यत् यद्यपि विलयः निरस्तः, किन्तु एतेषु विद्यालयेषु एका नूतना 'द्वैध-व्यवस्था' प्रवर्तयिष्यते-

> प्रत्येकस्मिन् स्थाने द्वौ पृथक्-पृथक् विद्यालयौ सञ्चालितौ भविष्यतः।

> एकः विद्यालयः सीबीएसई (CBSE) सम्बद्धः भविष्यति, अपरश्च हिमाचलप्रदेश- स्कूल- शिक्षा-मण्डलेन सह।

> द्वौ अपि विद्यालयौ सह-शिक्षा-आधारितौ भविष्यतः।

> सीबीएसई-सम्बद्धः विद्यालयः 'वरिष्ठ- माध्यमिक-विद्यालयः' इति पदं प्राप्स्यति।

> हिमाचल-मण्डल-सम्बद्धः विद्यालयः 'उच्च- विद्यालय' रूपेण सञ्चालयिष्यते।

## भवनानां संसाधनानां च पुनर्वितरणम्

अधिसूचनानुसारं, कः विद्यालयः किं भवनं प्राप्स्यति तथा च कस्मिन् परिसरे 'सीबीएसई' अथवा 'बोर्ड' विद्यालयः चलिष्यति अस्य अन्तिमनिर्णयः शिक्षा-निदेशकेन करिष्यते। एतदर्थं विद्यालयानां आधारभूत-संरचनायाः, सुविधानां च मूल्याङ्कनं भविष्यति।

**निर्णयस्य कारणम्-**

यद्यपि सर्वकारेण अधिसूचनायां स्पष्टं कारणं न उक्तं, किन्तु शिक्षाक्षेत्रे विलयं प्रति जायमानाः आपत्तयः, अभिभावकानां शिक्षकाणां च चिन्ताः दृष्ट्वा एषः निर्णयः महत्त्वपूर्णः मन्यते। विशेषतः बालक- बालिकानां विद्यालयानाम् एकत्रीकरणे स्थानीयस्तरे विरोधः अपि प्रकटितः आसीत्।

## शिक्षाव्यवस्थायां प्रभावः-

अनेन निर्णयेन एकतः विद्यालयानां परिचयः परम्परा च सुरक्षिता स्थास्यति, अपरतः 'सीबीएसई' तथा 'राज्य-मण्डल' इति द्वौ विकल्पौ एकस्मिन्नेव स्थाने उपलब्धौ भविष्यतः, येन छात्राः श्रेष्ठम् अवसरं लप्स्यन्ते। तथापि, संसाधनानां विभाजने प्रबन्धने च नूतनानि आह्वानानि अपि उद्भवितुं शक्नुवन्ति। शिक्षाविभागस्य सचिवः राकेश कँवरः आदेशं प्रसारयन् अवदत् यत् "एषः निर्णयः छात्राणां हिताय श्रेष्ठ-शैक्षणिक-वातावरणाय च स्वीकृतः अस्ति।"

# सीतामढ्याम् भव्यं शिलापूजनम्, मुख्यमन्त्री सम्राटचौधरी उद्घाटनं करिष्यति



**हिमसंस्कृतवार्ताः- राघव नाथ झा, सीतामढी,**
रामायण- अनुसन्धान- परिषदः तत्त्वावधाने राघोपुर- बखरी- स्थितस्य श्रीरामजानकी-मठस्य जीर्णोद्धार- सहित-शिलापूजन-कार्यक्रमस्य सर्वाः सिद्धताः सम्पन्नाः। निर्धारित-कार्यक्रमानुसारं बिहारस्य मुख्यमन्त्री सम्राट चौधरी अद्य सीतामढीं आगमिष्यति, यत्र सः विधिवत् मन्त्रउच्चारणेन सह शिलापूजनं करिष्यति, पुनौराधाम्नि आयोजिते जानकी-जन्मोत्सवावसरे सीतामढी- महोत्सवस्य उद्घाटनं शुभारम्भं च करिष्यति।

कार्यक्रमं प्रति जिला-प्रशासनं पूर्णतया सजगम् अस्ति। शुक्रवासरे मुख्यमन्त्रिणः विशेष-सुरक्षा- रक्षकदलेन कार्यक्रमस्थलस्य स्थलीयनिरीक्षणं कृतम्, सुरक्षा-व्यवस्थायाश्च परीक्षणं सम्पन्नम्। प्रशासनस्य पक्षतः हेलिपट्टनिर्माणम्, वाहन- निवेशन-व्यवस्था, जनसमूहनियन्त्रणम्, यातायात- प्रबन्धनम्, विधिव्यवस्था-रक्षणं च सम्यक् व्यवस्थापितम्।

श्रीरामजानकी-मठस्य महन्तः रामलीलादासः अवदत् यत् अयं मठः दीर्घकालात् श्रद्धालूनाम् आस्थायाः प्रमुखकेन्द्रम् अस्ति, किन्तु कालेन तस्य रचना जीर्णा अभवत्। अधुना तस्य जीर्णोद्धारेण न केवलं श्रद्धालुभ्यः उत्तमाः सुविधाः भविष्यन्ति, अपितु धार्मिक-क्रियाकलापेभ्यः अपि नूतनः विस्तारः प्राप्स्यते। तेन अधिकाधिकान् भक्तजनान् अस्मिन् ऐतिहासिके अवसरे उपस्थितुं पुण्यलाभं च प्राप्तुं आह्वानं कृतम्।

कार्यक्रमस्य सफलतां सुनिश्चितीकर्तुं परिषदः दलस्य पक्षतः स्थानीये स्तरि अनेकाः समीक्षासभाः आयोजिताः। तासु सभासु आयोजन-रूपरेखा, पूजनस्थलसज्जा, सुरक्षाव्यवस्था, जनसमूहनियन्त्रणम् इत्यादिषु विषयेषु विस्तीर्णा चर्चा अभवत्। संभावितजनसमागमं दृष्ट्वा विविधसमितयः गठिताः, यासु स्वयंसेवकेभ्यः पृथक् पृथक् दायित्वानि प्रदत्तानि। श्रद्धालूनां कृते प्रसाद-वितरणस्यापि विशेष-व्यवस्था कृता।

राष्ट्रीय-स्वयंसेवक-संघस्य विभाग-प्रचारकः मृत्युंजयकुमारः एतदायोजनं सामाजिक-एकतायाः प्रतीकमिति उक्त्वा सर्ववर्गेभ्यः सहयोगस्य आह्वानं कृतवान्। तेन उक्तं यत् एते प्रकाराः धार्मिक- सांस्कृतिक- कार्यक्रमाः समाजं संयोजयन्ति।

अस्मिन् अवसरे जिला-परिषद्-सदस्यः नागेन्द्ररायः, राजेशसिंहः इत्यादयः अनेकाः गणमान्यजनाः उपस्थिताः भविष्यन्ति। परिषदः प्रमुख-सदस्येषु ट्रस्टी राजीवसिंहः, सचिवः पीताम्बरमिश्रः, युवा-संयोजकः जयरामविप्लवः, कुमारस्मृतिः, ऋतुठाकुरः, प्रणिताठाकुरः इत्यादयः दशाधिकाः कार्यकर्तारः आयोजन-सज्जायां सक्रियतया संलग्नाः सन्ति।

ज्ञातव्यं यत् पञ्चविंशतितमे अप्रैल-मासे आयोजितं एतत् शिलापूजन-समारोहः धार्मिक-श्रद्धायाः, सांस्कृतिक-गौरवस्य, सामाजिक-एकतायाश्च प्रतीकत्वेन परिगण्यते। कार्यक्रमे सहस्रशः श्रद्धालूनां सहभागिता संभाव्यते, येन प्रशासनम् आयोजक-समितिश्च सर्वाः आवश्यक-व्यवस्थाः सम्पन्नवत्यौ स्तः।

# जयपुरस्थिते केन्द्रीयसंस्कृतविश्वविद्यालये जगद्गुरुशङ्कराचार्यजयन्त्युत्सवः





**डा. सच्चिदानन्दस्नेही।** वैदिकसनातनधर्मस्य रक्षणकार्यं यत् शताब्दिपूर्वं जगद्गुरुणा शङ्कराचार्येण कृतम्, तत् अद्यापि प्रासङ्गिकम् अस्ति। तेन चतुर्षु दिक्षु चत्वारः मठाः स्थाप्य शास्त्रस्य संस्कृतेः च संरक्षणं कृतम्। ज्ञानभक्तिमार्गाभ्यां सः सामान्यजनान् वैदिकधर्मे संयोजितवान्। एतद् विचारं जयपुरस्थिते केन्द्रीय- संस्कृत- विश्वविद्यालयपरिसरे शुक्रवासरे जगद्गुरोः शङ्कराचार्यस्य जयन्त्यां आयोजिते व्याख्यानसमारोहे विभिन्नैः वक्तृभिः व्यक्तम्। संयोजकेन डॉ. सच्चिदानन्दस्नेहिना उक्तं यत् प्रथमसत्रे मुख्यवक्ता प्रो. राजेन्द्रप्रसादशर्मा आसन्। तेन शङ्कराचार्यस्य जीवनविषये व्याख्यानं दत्तम्। परिसरे निदेशकेन प्रो. लोकमान्यमिश्रेण अध्यक्षीयभाषणे शङ्कराचार्यस्य ग्रन्थानाम् अध्ययनस्य महत्त्वं प्रतिपादितम्।

द्वितीयसत्रे जगद्गुरोः रामानन्दाचार्य- राजस्थान- संस्कृत- विश्वविद्यालयस्य दर्शनसंकायाध्यक्षः शास्त्री कोसलेन्द्रदासः शङ्कराचार्यस्य अद्वैतदर्शनस्य वैशिष्ट्ये व्याख्यानम् अकरोत्। डा. श्रीधरमिश्रः अध्यक्षीयभाषणे शास्त्रपरम्परायां शङ्कराचार्यस्य महत्त्वं प्रतिष्ठाप्य तस्य वेदान्तदर्शने अनुसन्धानस्य आवश्यकता व्यक्तवती। समारोहे डा. सन्तोषकुमाराचार्यः शङ्कराचार्यस्य जीवनं निरूपितवान् तथा डॉ. ब्रह्मानन्दप्रधानः शङ्करजयन्त्याः महत्त्वं प्रस्तुतवान्। डा. राजेशाधिकारी चलचित्रमाध्यमेन शङ्कराचार्यस्य जीवनं दर्शयन् तस्य कृतित्वं प्रकटितवान्। अन्ते डा. श्रीधरमिश्रः अध्यक्षीयभाषणं कृतवान् तथा डा. सन्तोषकुमाराचार्यः धन्यवादज्ञापनं कृतवान्।

# "रामायणकालिकं समाज वर्णनम्"

रामायणकालिकं समाजपरिवारस्य स्वरुपं पितृसत्तात्मकम् आसीत्। अयोध्यतः पित्राज्ञया एव रामः वनम् अगच्छत्। पतिव्रता स्त्रिषु सीता- अनसूया- कौशल्या- सुलोचना इत्यादिनां नामानि प्रसिद्धानि आसन्। शिक्षायाः स्वरुपं मौखिकम् आसीत्। तदानीं चत्वारः वर्णाः चत्वारः आश्रमाः षोडशसंस्काराश्च प्रचलिता आसन्। वाल्मीकि- भरद्वाज- विश्वामित्रादि ऋषीणाम् आश्रमेषु निरन्तरं यज्ञ- अग्निहोत्र- वेदाध्यायन- युद्धविद्यादीनाम् अध्ययनं भवति स्म। भारतीयसमाजस्य संस्कृतेश्च समुज्ज्वलं मर्यादितं स्वाभाविक स्वरुपं यथा रामायणे परिदृश्यते तथा नान्यत्र कुत्रापि।

**डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम् ®©**




# संस्कृतं मधुरं सदा- ३१

जगदिदं परमात्मनः दानस्वरूपम्। अत्रस्थं वस्तु, पदार्थः, प्राणिजीवनं, जगत्क्रिया इत्यादिकं सर्वमपि परमात्मना प्रदत्तं दानस्वरूपम् एव। दानं हि महत्वभूतं वर्तते सृष्टौ। अत्रस्थं भूमिः, जलम्, अग्निः, वायुः, आकाशः, वनस्पतिः इत्यादिकं सर्वमपि केनापि प्रकारेण कस्मैचन किमपि दानं हि कुर्वत् परिलक्ष्यते। अर्थादिदं समग्रजगद्धि दानमयं वर्तते। अनेन ज्ञायते यत् सर्वोऽपि मनुष्यः दानशीलः भवेदिति। अत्र दानविषये किञ्चित् शास्त्रमतं प्रस्तोतुं प्रयत्यते। दानस्य स्वरूपम् अत्यन्तं महत्त्वभूतं वर्तते। मानवकुलस्य कृते दानं परमावश्यकम्। विना दानं मानवोन्नतिः अवरुद्धा एव स्यात्। पात्रानुसारं शिक्षादानम्, अन्नजलादिदानम्, अभयोत्साहादिदानं, प्रेमश्रद्धादिदानम्, सेवासहयोगादिदानम् इत्यादीनि दानस्य मुखानि विविधानि सन्ति; तानि च मानवेन परेभ्य आदरपूर्वकं दातव्यानि सततम्।

तैत्तिरीयोपनिषदि दानसम्बद्धानि कानिचन प्रसिद्धानि वाक्यानि उपलभ्यन्त एवम्- "श्रद्धया देयम्।अश्रद्धया अदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्।" इति।

अर्थात् देश-काल-पात्रानुसारं दानं श्रद्धापूर्वकं कर्तव्यम्, विना श्रद्धां तत्कार्यं नोचितम्। स्वसामर्थ्यनुसारम् उदारतापूर्वकं विनम्रतापूर्वकञ्च तत्कार्यम् अवश्यम्। दानं न क्रियेत चेत् परलोके न किमपि लप्स्यते इति भीत्या देयम्, अथवा भगवान् मां दानयोग्यं कृतवानस्ति, अत एवं सन्नपि यदि कस्मै अपि किमपि दानं न दद्यां तर्ह्यहं कथं वा भगवत्पुरतो मे मुखदर्शनं सम्भवेदिति एतादृश्या भीत्या देयम्। प्रमादेन वृथा भयेन, उपेक्षया च अदत्वा, ज्ञानपूर्वकम्, विधिपूर्वकम्, आदरपूर्वकम् उदारतापूर्वकं निःस्वार्थतया च दानं करणीयम्। स्वाधीन्ये यत्किमपि वस्तु भवतु नाम, परन्तु तद्देयमिति दानधर्मः कथ्यते इति। शुभमस्तु!